## 100 - शततम दशकम्
## केशादि पाद वर्णनम्

अग्रे पश्यामि तेजो निबिडतर कलायावली लोभनीयं
पीयूषा प्लावितोऽहं तदनु तदुदरे दिव्य कैशोर वेषम् ।
तारुण्यारम्भ रम्यं परम सुख रसास्वाद रोमाञ्चिताङ्गै:
आवीतं नारदाद्यै: विलस दुपनिषत् सुन्दरी मण्डलैश्च ॥ ॥100-1॥

नीलाभं कुञ्चिताग्रं घन ममलतरं संयतं चारु भङ्ग्या
रत्नोत्तं साभिरामं वलयित मुदयच् चन्द्रकै: पिञ्छजालै: ।
मन्दार स्रङ् निवीतं तव पृथु कबरी भार मालोकयेऽहं
स्निग्ध श्वेतोर्ध्व पुण्ड्राम् अपि च सुललितां फाल बालेन्दु वीथीम् ॥ ॥100-2॥

हृद्यं पूर्णानुकम्पार्णव मृदु लहरी चञ्चल भ्रू विलासै:
आनील स्निग्ध पक्ष्मावलि परिलसितं नेत्र युग्मं विभो ते ।
सान्द्र च्छायं विशालारुण कमल दला कारं आमुग्ध तारं
कारुण्या लोक लीला शिशिरित भुवनं क्षिप्यतां मय्य नाथे ॥100-3॥

उत्तुङ्गोल्लासि नासं हरिमणि मुकुर प्रोल्लसत्-गण्ड पाली
व्यालोलत् कर्ण पाशाञ्चित मकर मणी: कुण्डल द्वन्द्व दीप्रम् ।
उन्मीलत् दन्त पङ्क्ति स्फुर दरुणतरच्छाय बिम्बाधरान्त:
प्रीति प्रस्यन्दि मन्दस्मित मधुर तरं वक्त्र मुद्भासतां मे ॥ ॥100-4॥

बाहु द्वन्द्वेन रत्नोज्ज्वल वलय भृता शोण पाणि प्रवालेन
उपात्तां वेणुनाली प्रसृत नख मयूखाङ्गुली सङ्गशाराम् ।
कृत्वा वक्त्रार विन्दे सुमधुर विकसत् राग उद्भाव्यमानै:
शब्द ब्रह्मामृतैस् त्वं शिशिरित भुवनै: सिञ्च मेकर्ण वीथीम् ॥ ॥100-5॥

उत्सर्पत् कौस्तुभ श्री ततिभिर रुणितं कोमलं कण्ठ देशं
वक्षश् श्रीवत्स रम्यं तरलतर समुद्दीप्र हार प्रतानम् ।
नाना वर्ण प्रसूनावलि किसलयिनीं वन्य मालां विलोलल्-
-लोलम्बां लम्ब मानाम् उरसि तव तथा भावये रत्न मालाम् ॥100-6॥

अङ्गे पञ्चाङ्ग रागैः अतिशय विकसत् सौर भाकृष्ट लोकं
लीना नेक त्रिलोकी वितति मपि कृशां बिभ्रतं मध्य वल्लीम् ।
शक्राश्म न्यस्त तप्तोज्ज्वल कनक निभं पीतचेलं दधानं
ध्यायामो दीप्त रश्मि स्फुटमणि रशना किङ्किणी मण्डितं त्वां ॥ ॥100-7॥

ऊरू चारू तवोरू घन मसृण रुचौ चित्त चोरौ रमायाः
विश्व क्षोभं विशङ्क्य ध्रुव मनिश मुभौ पीत चेलावृताङ्गौ ।
आनम्राणां पुरस्तात् न्यसन धृत समस्तार्थ पाली समुद्गत्
छायं जानु द्वयं च क्रम पृथुल मनोज्ञे च जङ्घे निषेवे ॥ ॥100-8॥

मञ्जीरं मञ्जु नादैरिव पद भजनं श्रेय इत्यालपन्तं
पादाग्रं भ्रान्ति मज्जत् प्रणत जन मनोमन्दरोद्धार कूर्मम् ।
उत्तुङ्गाताम्रराजन् नखर हिमकरज् ज्योत्स्नया चाऽश्रितानां
सन्ताप ध्वान्त हन्त्रीं तति मनुकलये मङ्गला मङ्गुलीनाम् ॥ ॥100-9॥

योगीन्द्राणां त्व दङ्गेष्वधिक सुमधुरं मुक्ति भाजां निवासो
भक्तानां काम वर्ष द्यु तरु किसलयं नाथ ते पाद मूलम् ।
नित्यं चित्त स्थितं मे पवन पुरपते कृष्ण कारुण्य सिन्धो
हृत्वा निश्शेष तापान् प्रदि शतु परमानन्द सन्दोह लक्ष्मीम् ॥ ॥100-10॥

अज्ञात्वा ते महत्वं यदिह निगदितं विश्वनाथ क्षमेथा:
स्तोत्रं चैतत् सहस्रोत्तम् अधिकतरं त्वत् प्रसादाय भूयात् ।
द्वेधा नारायणीयं श्रुतिषु च जनुषा स्तुत्यता वर्णनेन
स्फीतं लीलावतारै: इदमिह कुरुताम् आयुरारोग्य सौख्यम् ॥100-11॥

॥ ॐ नमो भगवते वासुदेवाय ॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥